
# दशमः पाठः। काव्यशास्त्रविनोदः। (कण्ठस्थीकरणार्थम्)

संस्कृतभाषायां सुभाषितानां महाभाण्डारं विद्यते। कानिचन सुभाषितानि चमत्कृतिपूर्णानि। तेषाम् अर्थावबोधः न सरलः। प्रहेलिकाः, कूटप्रश्नाः समस्यापूर्तिः च एते प्रकाराः अस्माकं कृते मस्तिष्कखाद्यम् एव। सुभाषितानां रचना हास्यरसपूर्णा हृद्या च। अतः एव एते काव्यप्रकाराः वाचकानां मनः विनोदयन्ति।




**साक्षरा विपरीताश्चेद् राक्षसा एव केवलम्।**
**सरसो विपरीतोऽपि सरसत्वं न मुञ्चति ।।१।।**

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्न घटो न मेघः ।।२।।**

**तातेन कथितं पुत्र पत्रं लिख ममाज्ञया।**
**न तेन लिखितं पत्रं पितुराज्ञा न लङ्घिता ।।३।।**

**न तस्यादिर्न तस्यान्तः यो मध्ये तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यो जानाति स पण्डितः ।।४।।**

**गङ्गायाश्चञ्चलतरे वारिणि प्रतिबिम्बितम्।**
**शोभते तारकायुक्तं शतचन्द्रं नभस्तलम् ।।५।।**



## स्पष्टीकरणम्

**श्लोकः १** – साक्षराः इति पदं विपरीतक्रमेण पठितं चेत् 'राक्षसाः' इति भवति । परं 'सरसः' इति पदम् यथानुक्रमं वा विपरीतक्रमेण पठितं चेत् 'सरसः' इत्येव भवति । अत्र कविकल्पना एवं कविकौशलं विभाति ।

**श्लोकः २** – सः वृक्षस्य अग्रे वसति किन्तु पक्षिराजः गरुडः न । तस्य त्रीणि नेत्राणि सन्ति किन्तु सः शूलपाणिः शङ्करः न। सः वल्कलसदृशं वस्त्रं धारयति किन्तु सः सिद्धयोगी न। सः जलं धारयति किन्तु सः न घटः न च मेघः । अस्य उत्तरं वर्तते नारिकेलफलम् ।

**श्लोकः ३** – तातेन कथितम्, ''हे पुत्र, मम आज्ञया पत्रं लिख।'' तेन पुत्रेण पत्रं न लिखितम् । तथापि पितुः आज्ञा न लङ्घिता। अर्थसङ्गतिः न दृश्यते। यदि 'न तेन'इति एकपदं क्रियते चेत् ' नतेन' इति पदेन अर्थबोधः भवति । नतेन नाम नम्रस्वभावेन पुत्रेण पत्रं लिखितम् । अपि च पितुः आज्ञा न लङ्घिता।

**श्लोकः ४** – कूटप्रश्नः अयम् । अस्य उत्तरम् – तस्य आदिः न, तस्य अन्तः न, तस्य मध्ये यः तिष्ठति ( तत् ) तव अपि अस्ति, मम अपि अस्ति।

**श्लोकः ५** – शतचन्द्रं नभस्तलम् । इति काचन समस्या वर्तते । आकाशे चन्द्राणां शतं कथं शक्यते? इत्येषा समस्या । समस्यापूर्तिः – गङ्गानद्याः जलं कल्लोलयुक्तं विद्यते। यदा गगने तारकाः चन्द्रमाः च विलसन्ति तदा चन्द्रमसः शतं प्रतिबिम्बानि गङ्गानद्याः जले दृश्यन्ते। तदा कविः कल्पनां करोति, 'नभः शतचन्द्रम्' इव दृश्यते।



**श्लोकः १**

**१. एकवाक्येन उत्तरत।**

अ) विपर्ययः कस्मिन् शब्दे दृश्यते ?
आ) विपर्ययः कस्मिन् शब्दे न दृश्यते ?
इ) मानवाः कीदृशाः भवेयुः ?
ई) मानवाः कीदृशाः न भवेयुः ?

**२. समानार्थकशब्दं लिखत।** राक्षसः, सरसः ।

**३. सन्धिविग्रहं कुरुत ।**

अ) विपरीतोऽपि =    आ) विपरीताश्चेत् =

**श्लोकः २.**

**१. एकवाक्येन उत्तरत।**

अ) वृक्षाग्रवासी कः ?    आ) कः पक्षिराजः ?
इ) कः त्रिनेत्रधारी ?    ई) कः शूलपाणिः ?
उ) कः जलं बिभर्ति ?    ऊ) कः त्वग्वस्त्रं धारयति ?

**२. शब्दसमूहस्य कृते एकं संक्षेपशब्दं लिखत।**

अ) यः वृक्षस्य अग्रभागे निवसति –
आ) पक्षिणां राजा –
इ) यस्य त्रीणि नेत्राणि –
ई) शूलं पाणौ यस्य सः –
उ) यः त्वग्वस्त्रं धारयति –

CGSHK4

**३. योग्यं पर्यायं चिनुत –**

अ) पक्षिराजः वृक्षाग्रे (वसति/न वसति)।
आ) घटः त्रीणि नेत्राणि (धारयति/न धारयति)।
इ) शूलपाणिः जलं (बिभर्ति / न बिभर्ति)।
ई) नारिकेलं त्वग्वस्त्रं (धारयति/न धारयति)।

**४. समानार्थकशब्दयुग्मं चिनुत लिखत च।**

पक्षिराजः, शूलपाणिः, जलम्, मेघः, शङ्करः, वृक्षः, सिद्धयोगी, गरुडः, तरुः, तोयम्, जलदः, तपस्वी।

**श्लोकः ३.**

**१. कः कं वदति?**    'पत्रं लिख।'

**२. एकवाक्येन उत्तरत।**

अ) केन आज्ञा दत्ता?    आ) केन आज्ञा न लङ्घिता।
इ) पत्रं केन लिखितम् ?

**३. विशेषण–विशेष्य–स्तम्भं पूरयत।**

| विशेषणम् | विशेष्यम् |
|---|---|
| ________ | पुत्रः |
| लिखितम् | ________ |

**४. सन्धिविग्रहं कुरुत।** ममाज्ञया, पितुराज्ञा

**५. श्लोकात् 'क्त' प्रत्ययान्तरूपाणि (कर्म.भू.धा.वि.) चिनुत लिखत च।**

**श्लोकः ४.**

**१. क्रमानुसारं रचयत।**

अ) त्रि–अक्षरयुक्ते शब्दे 'य' मध्ये तिष्ठति।
आ) शब्दस्य आरम्भे 'न' विद्यते।
इ) शब्दस्य अन्ते अपि 'न' विद्यते।

**२. प्राप्तम् उत्तरम् –** ☐ ☐ ☐

**३. सन्धिं कुरुत।**

अ) तस्य + आदिः (अ + आ) ________
आ) तस्य + अन्तः (अ + अ) ________
इ) तव + अपि (अ + अ) ________
ई) अपि + अस्ति (इ + अ) ________


**४. श्लोकात् षष्ठ्यन्तपदानि चिनुत लिखत च।**

**श्लोकः ५.**

**१. एकवाक्येन उत्तरत।**

अ) कस्याः नद्याः वर्णनं सुभाषिते वर्तते?
आ) शतचन्द्रं नभस्तलं कुत्र शोभते ?

**२. विशेषणैः जालरेखाचित्रं पूरयत।**




**३. विशेषणं लिखत।**

१) ____ वारिणि। २) ____ नभस्तलम्।

**४. गङ्गा इति शब्दस्य अमरपङ्क्तिं लिखत।**